Q.P. Code – 56641

# First Year M.A. Degree Examination

## SEPTEMBER/OCTOBER 2013

## (Directorate of Distance Education)

## (Repeaters and Freshers)

## SANSKRIT

## (DPA 510) Paper I – CLASSICAL LITERATURE – I

**Texts :** **1) Kiratarjuneeyam I and II Cantos**

**2) Mahashweta Vrittanta of Kadambari**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***Note :*** *Answer either in Sanskrit or Kannada or English.*

I. अधोनिर्दिष्ट पद्येषु द्वयं विवृणुत। **(2 × 5 = 10)**

(a) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।

(b) भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

(c) यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्।।

II. एकं गद्यभागं सानुवादं व्याख्यात : **(10)**

(a) मयोक्तम् – 'एषा खलु भगवतः श्वेतभानोरंशुसंभूतायाम् अप्सरसि गौर्यां समुत्पन्ना, देवस्य सकलगन्धर्व-मुकुटमणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य प्रणयप्रसुप्तगन्धर्वकामिनीकपोलपत्रलतालाञ्छित-भुजतरुशिखरस्य पादपीठीकृतलक्ष्मीकरकमलस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम, गन्धर्वाधिवासं हेमकूटाचलम् अभिप्रस्थिता।'

(अथवा)

(b) इत्थंभूते च व्यतिकरे छत्रग्राहिणी मामवोचत् – 'भर्तृदारिके! स्नाता देवी। प्रत्यासीदति गृहगमनकालः। तत्क्रियतां मज्जनविधिः' इति। अहं तु तेन तस्याः वचनेन नवग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छया कथं कथमपि समाकृष्यमाणा तन्मुखाल्लावण्यपङ्कमग्नामिव कपोलपुलककण्टकजालकलग्नामिव, मदनशरशला-काकीलितामिव, सौभाग्यगुणस्यूतामिव अतिकृच्छ्रेण दृष्टिमाकृष्य स्नातुमुदचलम्।

III. (a) महाकाव्येषु 'किरातार्जुनीयस्य' वैशिष्ट्यं विमृशत। **(10)**

(अथवा)

(b) भारवेः देशकालकृतीरधिकृत्य लिखत।

IV. (a) बाणस्य शैलीं अधिकृत्य प्रबन्धं लिखत। **(10)**

(अथवा)

(b) बाणस्य देशकालकृतीरधिकृत्य लिखत।

V. 'क' विभागद्वयं, 'ख' विभागद्वयं प्रसङ्गानुसारं व्याख्यात : **(4 × 2½ = 10)**

क विभागः

(a) करिणी पङ्कमिवावसीदति।

(b) वरं विरोधोऽपि समं महात्मभिः।

(c) यशस्तेखलु चापलाश्रयम्।

ख विभागः

(d) अमानुषलोकोचितं कुसुमगन्धमभ्यजिघ्रम्।

(e) अहो! रूपातिशयनिष्पादनोपकरणकोशस्याक्षीणता विधातुः।

(f) भगवन्! गृहाण। तवायमात्मजः।

VI. (a) संस्कृतभाषायां अनुवादं कुरुत। (केवलं कन्नड-आंग्लमाध्यम अभ्यर्थिनां कृते) **(10)**

The two friends of Shakuntala are worried about her future. Anasuya doubts whether the King would remember Shakuntala at all after joining his consorts in the harem. Priyamvada is afraid of Kanva's reaction towards his daughter when he came to know of her love-affair with the King. During these anxious moments, the irascible sage Durvasas announces his arrival at the hermitage. He sees Shakuntala and finds that she was unmindful of his presence there.

ಶಕುಂತಲೆಯ ಇಬ್ಬರು ಸ್ನೇಹಿತೆಯರೂ ಕೂಡ ಆಕೆಯ ಭವಿಷ್ಯದ ಬಗ್ಗೆ ಚಿಂತಿತರಾಗಿದ್ದರು. ರಾಜನು ತನ್ನ ಅಂತಃಪುರದ ರಾಣಿಯರನ್ನು ಸೇರಿದ ಮೇಲೆ ಶಕುಂತಲೆಯನ್ನು ಸ್ಮರಿಸುವನೋ, ಇಲ್ಲವೋ ಎಂದು ಅನಸೂಯೆಯು ಚಿಂತಿತಳಾಗಿದ್ದರೆ, ಆಶ್ರಮಕ್ಕೆ ಹಿಂದಿರುಗಿದ ಕಣ್ವರು ತನ್ನ ಮಗಳಿಗೆ ರಾಜನೊಂದಿಗಿನ ಪ್ರೇಮ ಸಂಬಂಧವನ್ನು ತಿಳಿದುಕೊಂಡ ನಂತರದ ಪ್ರತಿಕ್ರಿಯೆಯನ್ನು ಕುರಿತು ಪ್ರಿಯಂವದೆಯು ಹೆದರಿದ್ದಳು. ಇಂತಹ ಚಿಂತನಾತ್ಮಕ ಸನ್ನಿವೇಶದಲ್ಲಿ ತೀವ್ರ ಮುಂಗೋಪಿಯಾದ ದುರ್ವಾಸ ಮುನಿಯು, ತಾನು ಆಶ್ರಮವನ್ನು ಪ್ರವೇಶಿಸಿದ್ದಾಗಿ ಘೋಷಿಸಿ, ಶಕುಂತಲೆಯನ್ನು ನೋಡಿ, ಆಕೆ ತನ್ನ ಆಗಮನವನ್ನು ಗಮನಿಸದೆ, ಅನ್ಯ ಮನಸ್ಕಳಾಗಿರುವುದನ್ನು ಗುರುತಿಸುವನು.

**Q.P. Code – 56642**

# First Year M.A. Degree Examination

## SEPTEMBER/OCTOBER 2013

## (Directorate of Distance Education)

## SANSKRIT

## (DPA 520) Paper II – CLASSICAL LITERATURE – II

*Time : 3 Hours]* *[Max. Marks : 70/80*

***Note :*** *Answer either in Sanskrit or Kannada or English.*

I. (a) (i) अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाङ्कस्य वैशिष्ट्यं निरूपयत। **(10)**

(अथवा)

(ii) दुष्यन्तस्य पात्रचित्रणं कुरुत।

(b) द्वे अधिकृत्य लघुटिप्पणी लिखत। **(6)**

(i) नान्दी (ii) दुर्वासः

(iii) प्रियंवदा (iv) विदूषकः

II. (a) अधोनिर्दिष्टेषु द्वौ अनूद्य विवृणुत। **(2 × 5 = 10)**

(i) आ परितोषाद् विदुषां न साधुमन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।

(ii) असंशयं क्षत्रपदिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।।

(iii) विचिन्तयन्तीयमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।

(iv) प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः।।

(b) अधोनिर्दिष्टेषु **त्रीणि** ससन्दर्भं व्याख्यात। **(9)**

(i) आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि।

(ii) अथवा भवितव्यानि द्वाराणि भवन्ति सर्वत्र।

(iii) न प्रभातरलं ज्योतिरुदेतिवसुधातलात्।

(iv) सर्वदमन, शकुन्तलावण्यं पश्य।

III. (a) संस्कृतवाङ्मये गद्यसाहित्यमधिकृत्य प्रबन्धमेकं रचयत। **(10)**

(अथवा)

(b) 'उपमा कालिदासस्य' विशदयत ।

IV. (a) 'नैषधं विद्वदौषधम्' – समर्थयत। **(10)**

(अथवा)

(b) माघे सन्ति त्रयोगुणाः – विशदयत।

V. (a) संस्कृतरूपकक्षेत्रं प्रति श्रीहर्षस्य योगदानं निरूपयत। **(10)**

(अथवा)

(b) उत्तररामचरितेभवभूतिर्विशिष्यते।

VI. द्वे अधिकृत्य लघुटिप्पणी लिखत। **(5)**

(a) अंश्वघोषः

(b) विशाखदत्तः

(c) भवभूतिः

(d) सुभाषितानि

FOR FRESHERS ONLY

VII. (a) संस्कृत पञ्चमहाकाव्यानां नाम लिखित्वा विवृणुत। **(10)**

(अथवा)

(b) चम्पूकाव्यानां समीक्षत।

---

**Q.P. Code – 56643**

# M.A. (Previous) Degree Examination

## SEPTEMBER/OCTOBER 2013

## (Directorate of Distance Education)

## (For Repeaters and Freshers)

## SANSKRIT

## (DPA 530) Paper III – VYAKARANA AND BHARATIYA TATTVA SASTRA

**Texts :** **1) Siddhanta Kaumudi (From Karaka to Pradisamasa)**

**2) Nyayasutra (I and II chapters)**

**3) Sarvadarshana Sangraha (Carvaka, Bauddha, Ramanuja and Purnaprajna Darshana's only)**

*Time : 3 Hours]* *[Max. Marks : 70/80*

***Note :*** *Answer either in Sanskrit or Kannada or English.*

I. **चत्वारि** सूत्राणि सोदाहरणं विवृणुत। **(4 × 2½ = 10)**

(a) कर्तुरीप्सिततमं कर्म।

(b) कर्तृकरणयोस्तृतीया

(c) रुच्यर्थानां प्रीयमाणः

(d) ध्रुवमपायेऽपादानम्

(e) दिवस्तदर्थस्य

(f) यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी।

II. कर्मकारकं अधिकरणकारकं वा संक्षेपेण विवृणुत। **(5)**

III. **चतुर्णां** सप्रमाणं विग्रहवाक्यानि लिखत। **(4 × 2½ = 10)**

(a) भूतपूर्वः (b) उपकृष्णम्

(c) उपशरदम् (d) हरित्रातः

(e) चोरभयम् (f) पञ्चगवम्

IV. (a) न्यायसूत्रमनुसृत्य निग्रहस्थानं विवृणुत। **(10)**

(अथवा)

(b) न्यायसूत्रमनुसृत्य प्रत्यक्ष प्रमाणं विवृणुत।

V. (a) न्यायसूत्रमनुसृत्य **त्रीणि** सूत्राणि विवृणुत। **(3 × 3 = 9)**

(i) प्रसिद्धसाधर्म्यात्साधनमुपमानम्।

(ii) प्रवर्तनालक्षणा दोषाः।

(iii) बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्।

(iv) सप्रतिपक्षस्थापनाहीनो वितण्डा।

(b) न्यायसूत्रानुसारं **त्रयाणां** लघुटिप्पणीः लिखत। **(3 × 2 = 6)**

(i) आत्मा (ii) संशयः

(iii) यथार्थज्ञानम् (iv) कर्म

VI. (a) (i) रामानुजमतानुसारेण ईश्वरस्वरूपं निरूपयत। **(11)**

(अथवा)

(ii) पूर्णप्रज्ञमतानुसारेण 'तत्त्वमसि' इति श्रुतिवाक्यस्य अर्थ विवरणं कुरुत।

(b) **त्रयाणां** अधिकृत्य लघुटिप्पणीः लिखत। **(3 × 3 = 9)**

(i) बौद्धमते परमपुरुषार्थं।

(ii) बौद्धानां चत्वारः प्रत्ययाः।

(iii) रामानुजमते वासुदेवोपासना

(iv) आनन्दतीर्थः।

FOR FRESHERS ONLY

VII. (a) चार्वाकानां मोक्षसिद्धान्तं विवृणुत। **(10)**

(अथवा)

(b) दर्शनक्षेत्रं प्रति सायणमाधवाचार्यस्य योगदानं विवृणुत।

---

Q.P. Code – 56644

# M.A. (Previous) Degree Examination

## SEPTEMBER/OCTOBER 2013

## (Directorate of Distance Education)

## (For Repeaters and Freshers)

## SANSKRIT

## (DPA 540) Paper IV – SPECIAL ALANKARA – I

**Texts :** 1) **Appayya Dixita's Kuvalayananda (Upama to Vyatireka)**

2) **Dhvanyaloka – 1-2 chapters only**

3) **Theories of Alankara and Riti**

*Time : 3 Hours]* *[Max. Marks : 70/80*

*सूचना : उत्तराणि संस्कृतभाषया, कन्नडभाषया, आंग्लभाषया वा लिखत।*

I. अलङ्कारशास्त्रं प्रति वामनस्य उद्भटस्य वा योगदानं निरूपयत। (10)

II. चत्वारि अधिकृत्य सोदाहरणं विवृणुत। (4 × 3 = 12)

(a) उपमेयोपमा (b) स्मरणालङ्कारः

(c) उल्लेखः (d) दीपकालङ्कार

(e) परिणामः (f) निदर्शना

III. रूपकालङ्कारं उपमालङ्कारं वा सोदाहरणं व्याख्यात। (10)

IV. अलङ्कारद्वयं निर्दिश्य व्याख्यात। (2 × 4 = 8)

(a) पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः।

(b) पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः।

(c) शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः।

(d) धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि।

(e) धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्।

(f) अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम्।

## Q.P. Code – 56644

V. (a) 'वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ' विमर्शयत। **(10)**

(अथवा)

(b) ध्वन्यभाववादिनः वादान् विमृशत।

VI. अधोनिर्दिष्टेषु **द्वयं** व्याख्यात। **(2 × 4 = 8)**

(a) शोकः श्लोकत्वमागतः।

(b) वेद्यते सतु काव्यार्थ तत्त्वज्ञैरेव केवलम्।

(c) तदुपायतया तद्वदर्थे वाच्ये तदादृतः।

(d) अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्।

VII. अधोनिर्दिष्टेषु **चतुर्णां** काव्यसौन्दर्यं विवृणुत। **(4 × 3 = 12)**

(a) तस्या विनापि हारेण निसर्गादेव हारिणौ।
जनयामासतुः कस्य विस्मयं न पयोधरौ।।

(b) उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः।
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम्।।

(c) अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च सहकारः।
अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च हृदि मदनः।।

(d) शिखरिणि क्वनु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः।।

(e) आहूतोऽपि सहायैरोमित्युक्त्वा विमुक्तनिद्रोऽपि।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति।।

(f) उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं पुरोऽपि रागद्गलितं न लक्षितं।।

FOR FRESHERS ONLY

VIII. अलंकारशास्त्रं प्रति अप्पय्यदीक्षितस्य, आनन्दवर्धनस्य **वा** योगदानं विमृशत। **(10)**

---